# Shri Matangi Hridayam

# શ્રીમાતઙ્ગીહૃદયમ્

## Document Information

Text title : Matangi Hridayam

File name : mAtangIhRidayam.itx

Category : hRidaya, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, NA

Description-comments : Mantramaharnava madhyakhanda Matangitantra Dvadashataanga

Source : Dakshinamurtisamhita

Latest update : August 4, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Shri Matangi Hridayam

# શ્રીમાતઙ્ગીહૃદયમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

અથ શ્રીમાતઙ્ગીહૃદયપ્રારમ્ભઃ ॥

એકદા કૌતુકાવિષ્ટા ભૈરવં ભૂતસેવિતમ્ ।
ભૈરવી પરિપપ્રચ્છ સર્વભૂતહિતે રતા ॥ ૧॥

શ્રીભૈરવ્યુવાચ ।
ભગવન્સર્વધર્મજ્ઞ ભૂતવાત્સલ્યભાવન ।
અહં તુ વેત્તુમિચ્છામિ સર્વભૂતોપકારમ્ ॥ ૨॥
કેન મન્ત્રેણ જપ્તેન સ્તોત્રેણ પઠિતેન ચ ।
સર્વથા શ્રેયસાં પ્રાપ્તિર્ભૂતાનાં ભૂતિમિચ્છતામ્ ॥ ૩॥

શ્રીભૈરવ ઉવાચ ।
શ‍ૃણુ દેવિ તવ સ્નેહાત્પ્રાયો ગોપ્યમપિ પ્રિયે ।
કથયિષ્યામિ તત્સર્વં સુખસમ્પત્કરં શુભમ્ ॥ ૪॥
પઠતાં શ‍ૃણ્વતાં નિત્યં સર્વસમ્પત્તિદાયકમ્ ।
વિદ્યૈશ્વર્યસુખાવાપ્તિમઙ્ગલપ્રદમુત્તમમ્ ॥ ૫॥
માતંગ્યા હૃદયં સ્તોત્ર દુઃખદારિદ્ર્યભઞ્જનમ્ ।
મઙ્ગલં મઙ્ગલાનાં ચ હ્યસ્તિ સર્વસુખપ્રદમ્ ॥ ૬॥
॥ વિનિયોગઃ ॥
ૐ અસ્ય શ્રીમાતઙ્ગીહૃદયસ્તોત્રમન્ત્રસ્ય દક્ષિણામૂર્તિરૃષિઃ ।
વિરાટ્ છન્દઃ । માતઙ્ગી દેવતા । હ્રીં બીજમ્ । હૂં શક્તિઃ । ક્લીં કીલકમ્ ।
સર્વવાઞ્છિતાર્થસિદ્ધયે પાઠે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ ।
દક્ષિણામૂર્તિઋષયે નમઃ શિરસિ ।

વિરાટ્છન્દસે નમઃ મુખે ।
માતઙ્ગીદેવતાયૈ નમઃ હૃદિ ।
હ્રીં બીજાય નમઃ ગુહ્યે ।
હૂં શક્તયે નમઃ પાદયોઃ ।
ક્લીં કીલકાય નમઃ નાભૌ ।
વિનિયોગાય નમઃ સર્વાઙ્ગે । ઇતિ ઋષ્યાદિન્યાસઃ ॥

હૃદયાદિષડઙ્ગન્યાસઃ ।
ૐ હ્રીં હૃદયાય નમઃ ।
ૐ ક્લીં શિરસે સ્વાહા ।
ૐ હૂં શિખાયૈ વષટ્ ।
ૐ હ્રીં નેત્રત્રયાય વૌષટ્ ।
ૐ ક્લીં કવચાય હુમ્ ।
ૐ હૂં અસ્ત્રાય ફટ્ । ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

કરન્યાસઃ ।
ૐ હ્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ક્લીં તર્જનીભ્યાં નમઃ ।
ૐ હૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રીં અનામિકાભ્યાં નમઃ ।
ૐ ક્લીં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હૂં કરતલકરપૃષ્ઠાભ્યાં નમઃ । ઇતિ કરન્યાસઃ ॥

॥ અથ ધ્યાનમ્ ॥

ૐ શ્યામાં શુભ્રાંશુભાલાં ત્રિકમલનયનાં રત્નસિંહાસનસ્થાં
ભક્તાભીષ્ટપ્રદાત્રીં સુરનિકરકરાસેવ્યકઞ્જાંઘ્રિયુગ્મામ્ ।
નીલામ્ભોજાંશુકાન્તિં નિશિચરનિકરારણ્યદાવાગ્નિરૂપાં
પાશં ખડ્ગં ચતુર્ભિર્વરકમલકરૈઃ ખેટકં ચાઙ્કુશં ચ
(માતઙ્ગીમાવહન્તીમભિમતફલદાં મોદિનીં ચિન્તયામિ ) ॥ ૭॥
॥ ઇતિ ધ્યાનમ્ ॥

નમસ્તે માતંગ્યૈ મૃદુમુદિતતન્વૈ તનુમતાં
પરશ્રેયોદાયૈ કમલચરણધ્યાનમનસામ્ ।
સદા સંસેવ્યાયૈ સદસિ વિબુધૈર્દિવ્યધિષણૈ-

દયાર્દ્રાયૈ દેવ્યૈ દુરિતદલનોદ્દણ્ડમનસે ॥ ૮॥
પરં માતસ્તે યો જપતિ મનુમવ્યગ્રહૃદયઃ
કવિત્વં કલ્પાનાં કલયતિ સુકલ્પઃ પ્રતિપદમ્ ।
અપિ પ્રાયો રમ્યામૃતમયપદા તસ્ય લલિતા
નટીંમન્યા વાણી નટતિ રસનાયાં ચપલિતા ॥ ૯॥
તવ ધ્યાયન્તો યે વપુરનુજપન્તિ પ્રવલિતં
સદા મન્ત્રં માતર્નહિ ભવતિ તેષાં પરિભવઃ ।
કદમ્બાનાં માલાઃ શિરસિ તવ યુઞ્જન્તિ સદયે
ભવન્તિ પ્રાયસ્તે યુવતિજનયૂથસ્વવશગાઃ ॥ ૧૦॥
સરોજૈઃ સાહસ્રૈઃ સરસિજપદદ્વન્દ્વમપિ યે
સહસ્રં નામોક્ત્વા તદપિ તવ ઙેઽન્તં મનુમિતમ્ ।
પૃથઙ્નામ્નાં તેનાયુતકલિતમર્ચન્તિ ખલુ તે
સદા દેવવ્રાતપ્રણમિતપદામ્ભોજયુગલાઃ ॥ ૧૧॥
તવ પ્રીત્યૈ માતર્દદતિ બલિમાધાય બલિના
સમત્સ્યં માંસં વા સુરુચિરસિતં રાજરુચિતમ્ ।
સુપુણ્યા યે સ્વાન્તસ્તવચરણમોદૈકરસિકા
અહો ભાગ્યં તેષાં ત્રિભુવનમલં વશ્યમખિલમ્ ॥ ૧૨॥
લસલ્લોલશ્રોત્રાભરણકિરણક્રાન્તિકલિતં
મિતસ્મિત્યાપન્નપ્રતિભિતમમન્નં વિકરિતમ્ ।
મુખામ્ભોજં માતસ્તવ પરિલુઠદ્ભ્રૂમધુકરં
રમા યે ધ્યાયન્તિ ત્યજતિ ન હિ તેષાં સુભવનમ્ ॥ ૧૩॥

પરઃ શ્રીમાતંગ્યા જયતિ હૃદયાખ્યઃ સુમનસામ્-
અયં સેવ્યઃ સુધ્યોઽભિમતફલદશ્ચાતિલલિતઃ ।
નરા યે શ ૃણ્વન્તિ સ્તવમપિ પઠન્તીમમનિશં
ન તેષાં દુઃપ્રાપ્યં જગતિ યદલભ્યં દિવિષદામ્ ॥ ૧૪॥
ધનાર્થી ધનમાપ્નોતિ દારાર્થી સુન્દરીં પ્રિયામ્ ।
સુતાર્થી લભતે પુત્રં સ્તવસ્યાસ્ય પ્રકીર્ત્તનાત્ ॥ ૧૫॥
વિદ્યાર્થી લભતે વિદ્યાં વિવિધાં વિભવપ્રદામ્ ।
જયાર્થી પઠનાદસ્ય જયં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૬॥
નષ્ટરાજ્યો લભેદ્રાજ્યં સર્વસમ્પત્સમાશ્રિતમ્ ।
કુબેરસમસમ્પત્તિઃ સ ભવેધૃદયં પઠન્ ॥ ૧૭॥

કિમત્ર બહુનોક્તેન યદ્યદિચ્છતિ માનવઃ ।
માતઙ્ગી હૃદયસ્તોત્રપાઠાત્તત્સર્વમાપ્નુયાત્ ॥ ૧૮॥

ઇતિ શ્રીદક્ષિણામૂર્તિસંહિતાયાં શ્રીમાતઙ્ગીહૃદયસ્તોત્રં સમાપ્તમ્ ।
શ્રીમન્ત્રમહાર્ણવે મધ્યખણ્ડે માતઙ્ગીતન્ત્રે દ્વદશરતઙ્ગઃ ।

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, NA

*Shri Matangi Hridayam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*